# Shri Vyasaraja Stotram

# શ્રીવ્યાસરાજસ્તોત્રમ્

## Document Information

```
Text title : Shri Vyasaraja Stotram
File name : vyAsarAjastotram.itx
Category : deities_misc, gurudev
Location : doc_deities_misc
Author : vijayIndrabhikShu
Transliterated by : Krishnananda Achar
Proofread by : Krishnananda Achar
Description/comments : PanchayatistutiH
Acknowledge-Permission: C Narayanarao
Latest update : June 15, 2020
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 15, 2020

*sanskritdocuments.org*

# શ્રીવ્યાસરાજસ્તોત્રમ્

વન્દે મુકુન્દમરવિન્દભવાદિવન્દ્યં
    ઇન્દિન્દિરાપ્રતતમેચકમાકટાક્ષમ્ ।
બન્દીકૃતામરમમન્દમતિં વિદધ્યા-
    દાનન્દતીર્થહૃદયામ્બુજમત્તભૃઙ્ગઃ ॥ ૧॥

શ્રીવ્યાસયોગી હરિપાદરાગી
    ભક્તાતિપૂગી હિતદક્ષસદ્ગીઃ ।
ત્યાગી વિરાગી વિષયેષુ ભોગી
    મુક્તૌ સદા ગીતસુરેન્દ્રસઙ્ગી ॥ ૨॥

લક્ષ્મીશપાદામ્બુજમત્તભૃઙ્ગઃ
    સદા દશપ્રજ્ઞનયપ્રસઙ્ગઃ ।
અદ્વૈતવાદે કૃતમૂલભઙ્ગઃ
    મહાવ્રતીશો વિષયેષ્વસઙ્ગઃ ॥ ૩॥

સદા સદાયત્તમહાનુભાવઃ
    ભક્તાઘતૂલોચ્ચયતીવ્રદાવઃ ।
દૌર્જન્યવિધ્વંસનદક્ષરાવઃ
    શિષ્યાશ્ચ યો યચ્છતિ દિવ્યગાવઃ ॥ ૪॥

આદ્વૈતદાવાનલકાલમેઘઃ
    રમારમસ્નેહવિદારિતાઘઃ ।
વાગ્વૈખરીનિર્જિતસજ્જનૌઘઃ
    માયામતવ્રાતહિમે નિદાઘઃ ॥ ૫॥

મધ્વસિદ્ધાન્તદુગ્ધાબ્ધિવૃદ્ધિ પૂર્ણકલાધરઃ ।
વ્યાસરાજયતીન્દ્રો મે ભૂયાદીપ્સિતસિદ્ધયે ॥ ૬॥

યન્નામગ્રહણાદેવ પાપરાશિઃ પલાયતે ।

સોયં શ્રીવ્યાસયોગીન્દ્રો નિહન્તુ દુરિતાનિ નઃ ॥ ૭॥

યન્મૃત્તિકાદર્શનમાત્રભીતઃ
    ક્વચિત્પિશાચસ્તદનુવ્રતેભ્યઃ ।
દત્વા ધનં વાઞ્છિતમાપ્ય તસ્ય
    તૈર્વા જિતોયાદચિરેણ મુક્તિમ્ ॥ ૮॥

યત્કૌશિકાનાસિકાક્તજલાન્નિઃશઙ્કિતે નરે ।
વ્યાઘ્રો મહાનપિ સ્પ્રષ્ટું નાશકત્ત્વામિહાશ્રયે ॥ ૯॥

દ્વાત્રિંશત્સપ્તશતકમૂર્તીર્હનુમતઃ પ્રભોઃ ।
પ્રતિષ્ઠાતા સ્મૃતિખ્યાતસ્તં ભજે વ્યાસયોગિનમ્ ॥ ૧૦॥

સીમાનં તત્ર તત્રૈત્ય ક્ષેત્રેષુ ચ મહામતિઃ ।
વ્યવસ્થાપ્યાત્ર મર્યાદાં લબ્ધવાંસ્તમિહાશ્રયે ॥ ૧૧॥

મધ્વદેશિકસિદ્ધાન્તપ્રવર્તકશિખામણિઃ ।
સોયં શ્રીવ્યાસયોગીન્દ્રો ભૂયાદીપ્સિતસિદ્ધયે ॥ ૧૨॥

ભૂતપ્રેતપિશાચાદ્યા યસ્ય સ્મરણમાત્રતઃ ।
પલાયન્તે શ્રીનૃસિંહસ્થાનં તમહમાશ્રયે ॥ ૧૩॥

વાતજ્વરાદિરોગાશ્ચ ભક્ત્યા યમુપસેવિનઃ ।
દૃઢવ્રતસ્ય નશ્યન્તિ પિશાચાશ્ચ તમાશ્રયે ॥ ૧૪॥

તારપૂર્ણં બિન્દુયુક્તપ્રથમાક્ષરપૂર્વકમ્ ।
ચતુર્થ્યન્તં ચ તન્નામ નમઃશબ્દાન્તભૂષિતમ્ ॥ ૧૫॥

પાઠયન્તં મધ્વનયં મેઘગમ્ભીરયા ગિરા ।
ધ્યાયન્નાવર્તયેદ્યસ્તુ ભક્ત્યા મેધાં સ વિન્દતે ॥ ૧૬॥

રત્નસિંહાસનારૂઢં ચામરૈરભિવીજિતમ્ ।
ધ્યાયન્નાવર્તતે યસ્તુ મહતીં શ્રિયમાપ્નુયાત્ ॥

પ્રહ્લાદસ્યાવતારોસાવિન્દ્રસ્યાનુપ્રવેશવાન્ ।
તેન તત્સેવિનાં નૃણાં સર્વમેતદ્ભવેદ્ધ્રુવમ્ ॥ ૧૮॥

નમો વ્યાસમુનીન્દ્રાય ભક્તાભીષ્ટપ્રદાયિને ।
નમતાં કલ્પતરવે ભજતાં કામધેનવે ॥ ૧૯॥

વ્યાસરાજગુરો મહ્યં ત્વત્પાદામ્બુજસેવનાત્ ।

દુરિતાનિ વિનશ્શન્તુ યચ્છ શીઘ્રં મનોરથાન્ ॥ ૨૦॥

યો વ્યાસત્રયસંજ્ઞકાન્ દૃઢતરાન્ગ્ મધ્વાર્યશાસ્ત્રાર્થકાન્
    રક્ષદ્વજશિલાકૃતીન્ બહુમતાન્ગ્ કૃત્વા પરૈર્દુસ્તરાન્ ।
પ્રાયચ્છન્નિજપાદપદ્મસરસીજાસક્ત નૃણાં મુદા
    સોયં વ્યાસમુનીશ્વરો ભવતુ મે તાપત્રયક્ષાન્તયે ॥ ૨૧॥

મધ્વભક્તો વ્યાસશિષ્યપૂર્ણપ્રજ્ઞમતાનુગઃ ।
વ્યાસરાજમુનિશ્રેષ્ઠઃ પાતુ નઃ કૃપયા ગુરુઃ ॥ ૨૨॥

વ્યાસરાજ વ્યાસરાજ ઇતિ ભક્ત્યા સદા જપન્ ।
મુચ્યતે સર્વદુઃખેભ્યસ્તદન્તર્યામિણો બલાત્ ॥ ૨૩॥

સ્તુવન્નનેન મન્ત્રેણ વ્યાસરાજાય ધીમતે ।
અભિષેકાર્ચનાદીન્યઃ કુરુતે સ હિ મુક્તિભાક્ ॥ ૨૪॥

ગુરુભક્ત્યા ભવેદ્વિષ્ણુભક્તિરવ્યભિચારિણી ।
તયા સર્વં લભેદ્ધીમાંસ્તસ્માદેતત્સદા પઠેત્ ॥ ૨૫॥

ઇતિ શ્રીપરમહંસપરિવ્રાજકાચાર્યાણાં શ્રીસુરેન્દ્રતીર્થ પૂજ્યપાદાનાં
શિષ્યેણ વિજયીન્દ્રભિક્ષુણાવિરચિતં શ્રીવ્યાસરાજસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Krishnananda Achar

*Shri Vyasaraja Stotram*
pdf was typeset on June 15, 2020

Please send corrections to *sanskrit@cheerful.com*